# Kailasavarnanam 6

# कैलासवर्णनम् ६

## Document Information

Text title : Kailasavarnanam 6

File name : kailAsavarNanam6.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 26 - kailAsavarNane vRiSha(kRita)stutiH | 60-84||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# कैलासवर्णनम् ६

(कैलासशैले देवीप्रस्ताववर्णनम् ६)

स्कन्दः -
मणिक्लृप्ते महापीठे संस्थिता मुग्धदर्शना ।
लावकानां मयूराणां कुक्कुटानां मनोहरम् ॥ ६०॥

मेषसारङ्गशृङ्गोद्यत्स्फारनाराविदिक्तटम् ।
रम्यं रत्नाब्जिनीतीरं बद्धैर्दिक्षु मणीन्द्रकैः ॥ ६१॥

सोपानतीरसङ्क्लृप्तमणिसुन्दरमण्डपे ।
रत्नपञ्जरमध्यस्थान्रत्नशारीशुकाञ्छिवा ॥ ६२॥

पश्यन्ती दाडिमीबीजं ददाति शुकवक्त्रके ।
पूगद्रुवेष्टितापारद्राक्षावल्लीसुगुच्छके ॥ ६३॥

सन्ध्यावल्लीसुमारक्तचन्द्रिकापुष्पशोभिते ।
पर्यन्तकुल्यातीराच्छमणिबन्धसुधापयः ॥ ६४॥

पयोजविकसत्फुल्लहल्लकामोदमोदिते ।
धारासारमहायन्त्रशोभिते गन्धमोदिते ॥ ६५॥

पूगद्रुमौलिसञ्छादिमणिहर्म्योरुमञ्चगा ।
क्रीडाशिखण्डिविहितताण्डवं पश्यती शिवा ॥ ६६॥

महामणीन्द्रसङ्क्लृप्त सौधैरूपरिकल्पिते ।
नानाचित्रपटीक्लृप्तपटाम्बरगृहादरा ॥ ६७॥

तिरस्करणिकाक्लृप्तचतुर्दिक्ष्व मनोहरे ।
मणिकुम्भोद्यते देवी मणिस्तम्भविभूषिते ॥ ६८॥

सखीभिस्सह सल्लापं कुर्वन्ती संस्थिता क्वचित् ।
रथाकारमहासौधैर्मणिचक्रैर्हयैस्तथा ॥ ६९॥

पर्यन्तैव तत्सौधे सिद्महंसविराजिते ।
तत्रैवान्तर्गृहे देव्याः क्रीडाभवनमीशितुः ॥ ७० ॥

श्रीचक्राकारमतुलं तन्मणीन्द्रमनोहरम् ।
सहस्त्रयोजनायामं मणिचित्रगवाक्षकैः ॥ ७१ ॥

हंसपद्ममहाव्यालिपालीचित्रैर्विचित्रिते ।
मणिस्तम्भमहासारधाराररञ्जितभूतलैः ॥ ७२ ॥

वितानमालाकलितैर्मुक्तागुच्छालिलम्बितैः ।
मणिमञ्चैर्महापादैर्लम्बिताधस्थितैरपि ॥ ७३ ॥

तेषूद्यता महाशय्यास्सोपधानमनोहराः ।
चन्द्रमण्डलसङ्काशाः फेनगोक्षीरसप्रभाः ॥ ७४ ॥

सुमामोदितगन्धाढ्या मल्लिकापुष्पसंस्तृताः ।
भ्रमद्दीपगृहभ्राजन्मणिचित्रविभूषिताः ॥ ७५ ॥

देवस्य देव्याः क्रीडादिरसचित्रोरुकुट्टिमाः ।
धूपवृक्षैर्दीपवृक्षैर्मणिक्लृप्तैस्सहस्त्रशः ॥ ७६ ॥

ताम्बूलकल्पपात्तरैश्च मणिभृङ्गाकैश्शुभः ।
धूपपपात्रैर्दीपपात्रैः पुष्पताम्बूलपात्रकैः ॥ ७७ ॥

फलपूर्णैः रत्नपात्रैर्मणिकुम्भैस्भुधायुतैः ।
धूपामोदमणिद्योतिविराजितमनुत्तमम् ॥ ७८ ॥

मणिपुत्तलिकाक्लृप्तचारुचामरवीजनैः ।
व्यजनादर्शताम्बूलधृतपुत्तलिकायुतैः ॥ ७९ ॥

गणैश्च रहितो देवस्सखीविरहिता शिवा ।
तस्मिञ्छ्रीचक्रसौधे(चक्रमध्य) तु क्रीडतस्तौ शिवौ मुने ॥ ८० ॥

कैलासे नवशक्तिरत्नविलसत्पीठे महातत्ववा-
ग्जाते नैकगकोटिविस्तरयुते श्रीचक्रमध्यङ्गते ।
बिन्दौ चन्द्रदिनेशकोटियुगले मञ्चे च तत्पीठके
पञ्चब्रह्ममये वयं गिरिजया सार्धं हृदादध्महे ॥ ८१ ॥

कैलासे नवरत्नहर्म्यविलसन्मञ्चे सुधापान्निधौ (सुधाम्भोनिधेर्मध्ये)
काञ्चद्रन(कल्प)कवाटिकापरिवृते चिन्तामणीभायुते ।

सार्द्धं यो जगदम्बया रविमयं चैकं सुधावर्ष्मणो
रूपं कन्तुकमुत्क्षिपत्यनुदिनं तेनैव रात्रिन्दिवम् ॥ ८२॥

मूर्तीर्यो विधिविष्णुरुद्रसुरराडष्टौ पुमर्थानपि
चत्वार्येव युगानि वेदनिवहं दिव्यं फलानां गणम् ।
कुर्वन्नेव चतुर्दिशात्मकमठावैचित्र्यपीठे सदा
दीव्यन्त्सार्धमशेषभाग्यनिवहैः कृत्वा गृहं सम्मतम् ॥ ८३॥

कृत्स्नप्राणिकलापरम्य फलकस्तोमं विधायात्र वै
कालं कर्म च पाशकं सहि शिवो दीव्यन्त्सहास्तेऽम्बया ॥ ८४॥

देवीप्रस्तावव‍र्णनम्

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलासशैले वृषगोपुरवर्णनम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः २६ - कैलासवर्णने वृष(कृत)स्तुतिः । ६०-८४॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 26 - kailAsavarNane vRRiSha(kRRita)stutiH . 60-84..

Notes:
Skanda स्कन्द describes about the grand residence of Devī देवी Mount Kailāsa कैलास शैल, and mentions about the Śrīcakra श्रीचक्र - in the center of which She sports with Śiva शिव.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) शिवरहस्यम् अंशः-१ (माहेश्वराख्य) has several descriptions about Mount Kailāsa कैलास शैल and Śiva शिव. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasavarnanam 6*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*